कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन- विश्वविद्यालये लैङ्गिकविषयेषु संवेदनशीलता- जागरूकतासभा





हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः

कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन-विश्वविद्यालये १७ सितम्बरः, गुरुवासरे, आन्तरिक-आक्षेप- समितेः उपक्रमेण 'लैङ्गिकविषयेषु संवेदनशीलता, जागरूकता' इति विषयमधिकृत्य एका जागरूकतासभा समायोजिता।

विश्वविद्यालयस्य सभाकक्षे आयोजितेयं सभा दीपप्रज्वलनेन वेदमन्त्रपाठेन च प्रारब्धा। अस्मिन् कार्यक्रमे विश्वविद्यालयस्य कुलपतिः आचार्यः प्रह्लाद रा. जोशी, आश्रय-स्वयंसेवी-संस्थायाः, नलबारी इत्यस्याः अध्यक्षा रिङ्कु बरुवा महन्तः, आमन्त्रितातिथिरूपेण ग्राम्यविकासमञ्चस्य अध्यक्षः पृथ्वीराज डेका, विश्वविद्यालयस्य सहकुलपतिः प्रो. मल्लिका कलिता, कुलसचिवः डॉ. मनोजकुमार शर्मा, आन्तरिक-आक्षेप-समितेः अध्यक्षा प्रो. उमामहेश्वरी बगलु इत्येते उपस्थिताः आसन्।

तदतिरिक्तं समितेः सक्रियसदस्या डॉ. पापरी बरुवा इत्यादयः सर्वे सदस्याः, विश्वविद्यालयस्य प्राध्यापकाः प्राध्यापिकाश्च, शोधच्छात्राः, अशैक्षणिक- कर्मचारिणः, छात्राः छात्र्यश्च तथा क्षेत्रस्य स्थानीयाः जनाः सभायाम् उत्साहपूर्वकं सहभागं कृतवन्तः। सभायां स्वागतभाषणं कुर्वन् विश्वविद्यालयस्य कुलपतिः आचार्यः प्रह्लाद रा. जोशी शैक्षणिकसंस्थासु आन्तरिक-आक्षेप-समितेः गठनसम्बद्धानां ICC-नीतिनिर्देशानां विषये प्रकाशं पातितवान्। शैक्षणिकसंस्थासु सुरक्षितम्, सम्मानजनकं, समानतामूलकं वातावरणं निर्मातुं तादृशीनां समितीनां महत्त्वमपि सः विशेषतया प्रतिपादितवान्। सभायाः मुख्यवक्त्री आश्रय-स्वयंसेवी-संस्थायाः, नलबारी इत्यस्याः अध्यक्षा रिङ्कु बरुवा महन्तः स्वजीवने पुरुषाणां महिलानां च समानरूपेण स्वावलम्बित्वस्य महत्त्वं प्रतिपादितवती। सा आन्तरिक- आक्षेप-समितिसम्बद्धानां विधीनां, तेषां सम्यगुपयोगस्य च विषये विस्तरेण विवेचनं कृतवती। कार्यक्रमे आमन्त्रितातिथिः ग्राम्यविकासमञ्चस्य अध्यक्षः पृथ्वीराज डेका प्राचीनमूल्यानाम् आधुनिकचिन्तनस्य च मध्ये समन्वयं स्थापयित्वा संस्कारस्य, नैतिकतायाः तथा मूल्यशिक्षायाः माध्यमेन प्राचीनस्य आधुनिकस्य च मध्ये सुदृढं सेतुनिर्माणं कर्तुं शक्यते इति प्रतिपादितवान्। समाजे लैङ्गिकवैषम्यस्य निवारणाय सः विविधान् उपयोगिनः परामर्शान् अपि प्रदत्तवान्। विश्वविद्यालयस्य धर्मशास्त्रविभागस्य विभागाध्यक्षा डॉ. मैत्रेयी गोस्वामी कार्यक्रमस्य सञ्चालनं कृतवती। अन्ते सा उपस्थितेभ्यः सर्वेभ्यः कृतज्ञतां धन्यवादं च ज्ञापितवती। अन्तिमे शान्तिमन्त्रपाठेन अस्याः जागरूकतासभायाः समापनं जातम्



कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयस्य मुख्यसभागारे अद्य 'विदुषां सम्मानम्' इति भव्यः कार्यक्रमः सानन्दं सुसम्पन्नः

हिमसंस्कृतवार्ता डॉ. निशिकान्तपाण्डेयः नलबारी,

असमराज्यस्य नलबारीमण्डले स्थितस्य कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयस्यास्य प्राङ्गणे २५ अगस्त २०२६ दिनाङ्कतः ३१ अगस्त-२०२६ दिनाङ्कं यावत् आयोज्यमानस्य 'संस्कृतसप्ताहमहोत्सवस्य' अद्य मुख्यकार्यक्रमः आसीत्।

अस्य कार्यक्रमस्य मुख्यमुद्देश्यम् असमप्रान्तस्य तेषां वरिष्ठविदुषां सम्माननमसीत्, यैः सर्वदा स्वजीवनस्य बहुमूल्यं समयं संस्कृतभाषायाः निस्वार्थसेवायै समर्पितम्। कार्यक्रमस्य शुभारम्भः वैदिकमङ्गलाचरणेन अभवत्। तत्पश्चात् विश्वविद्यालयस्य छात्रैः मधुरसंस्कृतगीतेन सर्वेषां समागतानां विदुषां स्वागतं कृतम्। अस्मिन् कार्यक्रमे पञ्च प्रमुखविद्वान्सः आमन्त्रिताः आसन्— श्रीमान् वीरेन्द्रनाथमिश्रवर्यः, श्रीमान् रमणीकान्तशर्मावर्यः, डा.नकुलचन्द्रडेकावर्यः, श्रीमान् उमेशचन्द्रशर्मावर्यः, श्रीमान् उमेशशर्मावर्यश्च। एतेषु श्रीमान् वीरेन्द्रनाथमिश्रः, डा.नकुलचन्द्रडेका, श्रीमान् उमेशचन्द्रशर्मा च इति त्रयः विद्वांसः उपस्थिताः आसन् । द्वौ विद्वान्सौ केनचित् कारणेन आगन्तुं न शेकतुः । उपस्थितेभ्यः विद्वद्भ्यः प्रशस्तिपत्राणि, असमियासंस्कृतेः प्रतीकानि गामोछावस्त्रम्, पाटवस्त्रं (सेलेङ्), तथा 'जापी' इति प्रदाय तेषां भव्यं सम्माननं कृतम् । विश्वविद्यालयस्य कुलपतिः प्रोफेसर-प्रह्लाद राजोशीवर्यः स्वकीयसारगर्भितभाषणेन विदुषां भूरिशः प्रशंसां कृतवान्, संस्कृतदिवसस्य पावनमहत्त्वं च स्पष्टीकृतवान्। तेनोक्तं यत् संस्कृतस्य संवर्धनाय सर्वत्र संस्कृतसप्ताहरिव कार्यक्रमो भवेत्। अनेन छात्रेषु संस्कृतं प्रति रुचिरपि वर्धिष्यते। ततः वेदाध्ययनविभागस्य सहायकाचार्यः डा.महेशचिदम्बरभट्टवर्यः विश्वविद्यालयस्य ध्येयमन्त्रस्य "सरस्वती श्रुतिमहतां महीयताम्" इत्यस्य अर्थसहितं स्पष्टं वाचनं कृतवान् । सम्मानितविद्वांसः संस्कृतसेवायाः स्वकीय-अनुभवान् प्रास्तौषन्, छात्रांश्च संस्कृतस्य संरक्षणाय, अध्ययनाय अनुसन्धानाय च सततं प्रेरयामासुः। समारोहस्यास्य मुख्यतत्त्वावधायिका सर्वदर्शनविभागस्य आचार्या प्रोफेसर-उमामहेश्वरी-बीवर्या आसीत्। कार्यक्रमस्य सञ्चालनं पुराण-इतिहासविभागस्य प्रभारी-अध्यक्षः श्रीमान् विवेक आचार्यवर्यः कृतवान्। अवसरेऽस्मिन् विश्वविद्यालयस्य सम-कुलपतिः आचार्या मल्लिका कलिता, परीक्षानियन्त्रकमहोदयः, कोषाध्यक्षमहोदयः, सर्वेषां विभागानामध्यक्षाः, अध्यापकाः, शोधच्छात्राः, सर्वे छात्राश्च उपस्थिताः आसन्। अयं गरिमामयः कार्यक्रमः अतीव साफल्येन प्रसन्नतापूर्वकं च सम्पन्नः अभवत्।

कुमारभास्करवर्म संस्कृत एवं प्राचीन अध्ययन विश्वविद्यालय के सर्वदर्शन विभाग द्वारा १०८-व्याख्यानमाला का इक्कीसवाँ व्याख्यान सम्पन्न

प्रे.सं.नलबाड़ी, २ सितंबर : आज कुमारभास्करवर्म संस्कृत एवं पुरातनाध्ययन विश्वविद्यालय के सर्वदर्शन विभाग तथा सर्वदर्शन मंथन परिषद् के संयुक्त तत्वावधान में आयोजित १०८-व्याख्यानमाला के अंतर्गत इक्कीसवाँ (२१वाँ) व्याख्यान श्रीश्री महापुरुष माधवदेव की पावन तिरोभाव-तिथि के अवसर पर अत्यंत गरिमामय वातावरण में सफलतापूर्वक सम्पन्न हुआ।कार्यक्रम का शुभारम्भ मंगलाचरण से हुआ। सर्वदर्शन विभाग की प्रतिभाशाली छात्रा सुश्री सुमी दास ने मधुर स्वर में मंगलाचरण प्रस्तुत किया। इसके पश्चात् सर्वदर्शन विभाग के अध्यक्ष प्रो. रणजीत कुमार तिवारी ने उपस्थित विद्वानों एवं अतिथियों का स्वागत करते हुए व्याख्यान के उद्देश्य पर विस्तार से प्रकाश डाला। तत्पश्चात विभाग की शोधार्थी तपस्विनी कुमारी ने असम की भक्ति-परम्परा की अमूल्य धरोहर 'बरगीत' का सुमधुर गायन प्रस्तुत किया, जिससे सम्पूर्ण सभागार भक्तिरस से सराबोर हो उठा।इस व्याख्यान का मुख्य विषय ङ्कश्रीश्री माधवदेव का जीवन-दर्शनङ्क था। इस विषय पर मुख्य वक्ता के रूप में विश्व हिन्दू महासंघ समिति के अध्यक्ष तथा श्री दक्षिणपाट गृहाश्रमी सत्र के सत्राधिकार परमपूज्य श्री जनार्दनदेव गोस्वामी ने अपना ओजस्वी एवं विचारोत्तेजक व्याख्यान प्रस्तुत किया। उन्होंने महापुरुष माधवदेव के त्यागमय जीवन, उनके भक्ति-दर्शन, समाज-सुधार संबंधी विचारों तथा असमिया साहित्य एवं संस्कृति के प्रति उनके अतुलनीय योगदान का विस्तृत विवेचन किया।

इस गरिमामय कार्यक्रम में विश्वविद्यालय की समकुलपति आदरणीया आचार्या मल्लिका कलिता विशेष रूप से उपस्थित रहीं और अपनी उपस्थिति से कार्यक्रम की शोभा बढ़ाई। इसके अतिरिक्त, साहित्य-विभाग के अध्यक्ष, प्रो रातुल बुजरबरुवा, सर्वदर्शन विभाग की प्राध्यापिका डॉ. उमामहेश्वरी बी., दर्शन विभाग के अध्यक्ष डॉ. विकास भार्गव शर्मा, ज्योतिष विभाग के आचार्य डॉ. गणेश प्रसाद मिश्र तथा अन्य विभागों के विभागाध्यक्ष, प्राध्यापक, शोधार्थी एवं बड़ी संख्या में छात्र-छात्राएँ भी उपस्थित रहे। कार्यक्रम का कुशल एवं सुव्यवस्थित संचालन सर्वदर्शन विभाग के शोधार्थी श्री लिराज काफ्ले ने किया।कार्यक्रम के समापन अवसर पर सर्वदर्शन विभाग की अतिथि अध्यापिका सुश्री मयूरी बरकाकती ने सभी गुरुओं, वक्ताओं एवं विद्यार्थियों के प्रति आभार व्यक्त करते हुए धन्यवाद ज्ञापित किया। इसके उपरान्त उन्होंने विश्वकल्याण की भावना से मंगलमय कल्याण-मंत्र का पाठ कराया, जिसके साथ यह ऐतिहासिक कार्यक्रम सफलतापूर्वक सम्पन्न हुआ।अब सवाल यह उठ रहा है कि यदि जांच में सड़क निर्माण में निर्धारित मानकों की अनदेखी या घटिया सामग्री के इस्तेमाल की पुष्टि होती है, तो इसके लिए जिम्मेदार लोगों के खिलाफ क्या कार्रवाई की जाएगी।





म् (सूरतम्)

वार: गुरूवासर:

दिनाङ्क : 03 सितम्बर 2026

कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयस्य

सर्वदर्शनविभागेन १०८-व्याख्यानमालाया: एकविंशतितमं व्याख्यानं सम्पन्नम्

वार्ताहर : डॉ. निशिकान्तपाण्डेय:

नलबारी, असम: ।अद्य कुमारभास्कर वर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयस्य सर्वदर्शनविभागेन सर्वदर्शनमन्थनपरिषद:संयुक्ततत्त्वावधाने आयोजितस्य १०८-व्याख्यानमालाकार्यक्रमस्य एकविंशतितमं (२१) व्याख्यानं श्रीश्रीमहापुरुषमाधवदेवस्य पावनतिरोभावतिथिमधिकृत्य अत्यन्तं गरिमामयवातावरणे साफल्येन सम्पन्नम्।

कार्यक्रमस्य शुभारम्भ: लौकिकमङ्गलाचरणेन सह अभवत्। लौकिक मङ्गलाचरणं सर्वदर्शन विभागस्य प्रतिभावत्या छात्रया सुमी दास: इत्यनया मधुरस्वरेण विधत्तम्। तदनन्तरं सर्वदर्शनविभागस्य अध्यक्ष: माननीय: प्रो. रणजीतकुमारतिवारीमहोदय: उपस्थितविदुषाम् अभ्यागतानां च स्वागतं कुर्वन् व्याख्यानस्य मुख्यमुद्देश्यं सविस्तरं स्पष्टीकृतवान्। तत्पश्चात् विभागस्य शोधछात्रा तपस्विनी कुमारी असमस्य भक्तिपरम्परायाः अमूल्यनिधिभूतं सुमधुरं बरगीतं प्रस्तुतवती, येन समस्तं सभागृहं भक्तिरसमयं जातम्।





अस्यव्याख्यानस्यमुख्यविषय:"श्रीश्रीमधवदेवस्य जीवनदर्शनम्" इति आसीत्। अस्मिन् विषये मुख्यवक्तृरूपेण विश्वहिन्दूमहासंघसमित्या: अध्यक्ष: तथा च श्रीदक्षिणपाटगृहाश्रमीसत्रस्य सत्राधिकार: परमपूज्य: श्रीजनार्दनदेवगोस्वामी महोदय: स्वकीयम् ओजस्विविचारगर्भितं वक्तव्यमुपस्थापितवान्। स: महापुरुषमाधवदेवस्य त्यागमयं जीवनम्, तस्य भक्तिदर्शनम् , समाजसंस्कारका: विचारा: असमीया-साहित्य-संस्कृत्यो: तस्य अतुलनीयं योगदानं च सविस्तरं प्रतिपादितवान्।

अस्मिन् गरिमामये कार्यक्रमे विश्वविद्यालयस्य समकुलपति: आदरणीया आचार्या मल्लिकाकलिता महोदया विशेषरूपेण उपस्थिता भूत्वा कार्यक्रमस्य शोभां वर्धितवती। एतदतिरिक्तं सर्वदर्शनविभागस्य प्राध्यापिका उमामहेश्वरी बी, साहित्यविभागस्य अध्यक्ष: प्रो. रातुलबुजरबरुवामहोदय:, दर्शनविभागस्य अध्यक्ष: विकासभार्गवशर्मा, ज्योतिषविभागस्य आचार्य: गणेशप्रसादमिश्र:, अन्येषामपि विभागानां विभागाध्यक्षा:, प्राध्यापका:, शोधच्छात्रा:, अध्ययनरता: छात्र-छात्रा: च महत्या संख्यायामुपस्थिता आसन्। सम्पूर्णस्य अस्य कार्यक्रमस्य कुशलं सुव्यवस्थितं च सञ्चालनं सर्वदर्शनविभागस्य शोधछात्रेण लिराजकाफ्ले महोदयेन कृतम्। कार्यक्रमस्य समापने सर्वदर्शनविभागस्य अतिथ्यध्यापिका सुश्री मयूरी बरकाकती महोदया उपस्थितानां सर्वेषां गुरून्, वक्तॄन्, छात्रान् च प्रति कृतज्ञतां प्रकटयन्ती धन्यवादज्ञापनमकरोत्। तदनन्तरं तया एव विश्वकल्याणस्य भावनां धृत्वा मङ्गलमयस्य कल्याणमन्त्रस्य पाठ: कृत:, येन सह एष एष: ऐतिहासिक: कार्यक्रम: साफल्येन सम्पन्न: अभवत्।

कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्व-विद्यालयस्य सर्वदर्शनविभागेन १०८-

व्याख्यानमालायाः एकविंशतितमं व्याख्यानं सम्पन्नम्

हिमसंस्कृतवार्ताः- डॉ. निशिकान्त-पाण्डेयः, नलबारी, असमः

कुमारभास्करवर्मसंस्कृत- पुरातनाध्ययन-विश्वविद्यालयस्य सर्वदर्शनविभागेन सर्वदर्शन-मन्थनपरिषदः संयुक्तत्त्वावधाने आयोजितस्य १०८- व्याख्यानमालाकार्यक्रमस्य एकविंशतितमं (२१) व्याख्यानं श्रीश्रीमहापुरुषमाधवदेवस्य पावनतिरोभावतिथिमधिकृत्य अत्यन्तं गरिमामयवातावरणे साफल्येन सम्पन्नम्।

कार्यक्रमस्य शुभारम्भः लौकिकमङ्गलाचरणेन सह अभवत्। लौकिकमङ्गलाचरणं सर्वदर्शनविभागस्य प्रतिभावत्या छात्रया सुमीदासः इत्यनया मधुरस्वरेण विधत्तम्। तदनन्तरं सर्वदर्शनविभागस्य अध्यक्षः माननीयः प्रो. रणजीतकुमारतिवारीमहोदयः उपस्थितविदुषाम् अभ्यागतानां च स्वागतं कुर्वन् व्याख्यानस्य मुख्यमुद्देश्यं सविस्तरं स्पष्टीकृतवान्।तत्पश्चात् विभागस्य शोधच्छात्रा तपस्विनी कुमारी असमस्य भक्तिपरम्परायाः अमूल्यनिधिभूतं सुमधुरं बरगीतं प्रस्तुतवती, येन समस्तं सभागृहं भक्तिरसमयं जातम्। अस्य व्याख्यानस्य मुख्यविषयः "श्रीश्रीमधवदेवस्य जीवनदर्शनम्" इति आसीत्। अस्मिन् विषये मुख्यवक्तृरूपेण विश्वहिन्दूमहासंघसमित्याः अध्यक्षः, श्रीदक्षिणपाटगृहाश्रमीसत्रस्य सत्राधिकारः परमपूज्यः श्रीजनार्दनदेवगोस्वामीमहोदयः स्वकीयम् ओजस्विविचारगर्भितं वक्तव्यमुपस्थापितवान्। सः महापुरुषमाधवदेवस्य त्यागमयं जीवनं, तस्य भक्तिदर्शनम्, समाजसंस्कारकाः विचाराः असमीया- साहित्य-संस्कृत्योः तस्य अतुलनीयं योगदानं च सविस्तरं प्रतिपादितवान्। अस्मिन् गरिमामये कार्यक्रमे विश्वविद्यालयस्य समकुलपतिः आदरणीया आचार्या मल्लिकाकलिता महोदया विशेषरूपेण उपस्थिता भूत्वा कार्यक्रमस्य शोभां वर्धितवती। एतदतिरिक्तं सर्वदर्शनविभागस्य प्राध्यापिका उमामहेश्वरी बी, साहित्यविभागस्य अध्यक्षः प्रो. रातुलबुजरबरुवामहोदयः, दर्शनविभागस्य अध्यक्षः विकासभार्गवशर्मा, ज्योतिषविभागस्य आचार्यः गणेशप्रसादमिश्रः, अन्येषामपि विभागानां विभागाध्यक्षाः, प्राध्यापकाः, शोधच्छात्राः, अध्ययनरताः छात्रच्छात्राः च महत्या संख्यायामुपस्थिता आसन्। सम्पूर्णस्य अस्य कार्यक्रमस्य कुशलं सुव्यवस्थितं





च सञ्चालनं सर्वदर्शनविभागस्य शोधछात्रेण लिराजकाफ्ले महोदयेन कृतम्। कार्यक्रमस्य समापने सर्वदर्शनविभागस्य अतिथ्यध्यापिका मयूरीबरकाकतीमहोदया उपस्थितानां सर्वेषां गुरून्, वक्तॄन्, छात्रान् च प्रति कृतज्ञतां प्रकटयन्ती धन्यवादज्ञापनमकरोत्। तदनन्तरं तया एव विश्वकल्याणस्य भावनां धृत्वा मङ्गलमयस्य कल्याणमन्त्रस्य पाठः कृतः, येन सह एव एषः ऐतिहासिकः कार्यक्रमः साफल्येन सम्पन्नः।

कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन विश्वविद्यालये ज्योतिषविभागेन "विशिष्टव्याख्यानम्" इति कार्यक्रमः सम्पन्नः



हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः। नलबार्यां स्थित- कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन विश्वविद्यालयस्य ज्योतिषविभागेन अद्य "विशिष्टव्याख्यानम्" इति कार्यक्रमः आयोजितः। अस्य कार्यक्रमस्य अध्यक्षता विश्वविद्यालयस्य माननीयेन कुलपतिना प्रो. प्रह्लाद- रा. जोशीमहोदयेन कृता। मुख्यवक्तृरूपेण केन्द्रीय- संस्कृत- विश्वविद्यालयस्य जम्मूपरिसरतः डॉ. मृत्युञ्जयतिवारीमहोदयाः उपस्थिताः आसन्। कार्यक्रमस्य शुभारम्भः ज्योतिषविभागस्य छात्रेण रितिक खनालेन प्रस्तुतेन वैदिकमङ्गलाचरणेन अभवत्। तदनन्तरं वेद-वेदाङ्ग-सङ्कायप्रमुखैः डॉ. सुधाकरमिश्रमहोदयैः आगतानाम् अतिथीनां विदुषां च स्वागतं कृतम्।स्वकीये अध्यक्षीये उद्बोधने कुलपतिवर्यैः प्रो. प्रह्लाद रा. जोशीमहोदयैः भारतीयज्ञानपरम्परायां ज्योतिषस्य महत्त्वं प्रतिपादितम्। तैः उक्तं यत् ज्योतिषं केवलं भविष्यकथनमात्रं नास्ति, अपि तु भारतीयज्ञानविज्ञानस्य एका महती प्राचीना च शाखा वर्तते। तैः छात्राः ज्योतिषस्य शास्त्रीयस्वरूपेण सहैव तस्य वैज्ञानिक- तार्किक- पक्षं बोद्धु शोधदृष्ट्या च अग्रे गन्तुं प्रेरिताः। मुख्यवक्तृभिः डॉ. मृत्युञ्जयतिवारीमहोदयैः स्वव्याख्याने ज्योतिषस्य वैज्ञानिकतां गणितीय- आधारं खगोलीयपरम्परां च विस्तरेण प्रकाशितम्। तैः प्रतिपादितं यत् भारतीयज्योतिषपरम्परायां ग्रहनक्षत्राणां गतिः, कालगणना, गणितीय- सिद्धान्ताः पञ्चाङ्गनिर्माणञ्च सुव्यवस्थित-गणनासु आधृतानि सन्ति। ज्योतिषाध्ययने शास्त्रीयप्रमाणानि गणितपद्धतिः तार्किकदृष्टिकोणश्च आवश्यकाः इति कथयद्भिः तैः छात्रेभ्यः आह्वानं कृतम्। यत् छात्राः आधुनिक- शोधपद्धत्या सह भारतीयज्योतिषस्य वैज्ञानिक- पक्षस्य अध्ययनं कुर्युः। कार्यक्रमस्य सञ्चालनं डॉ. गणेशप्रसादमिश्रमहोदयैः कृतम्। तैः कार्यक्रमस्य सर्वेषां चरणानां कुशलतापूर्वकं निर्वहणं कृतम्। धन्यवादज्ञापनं ज्योतिष- विभागाध्यक्षैः डॉ. नन्दनकुमारतिवारीमहोदयैः सम्पादितम्। तैः सर्वेभ्यः अतिथिभ्यः शिक्षकेभ्यः छात्रेभ्यश्च कृतज्ञतां ज्ञापयद्भिः मानवजीवने ज्योतिषशास्त्रस्य उपयोगिता विवृता। अस्मिन् कार्यक्रमे मुख्यरूपेण न्यायविभागाध्यक्षाः डॉ. राजीवलोचनशर्माणः, ज्योतिषविभागस्य छात्राः विश्वविद्यालयस्य अन्ये सदस्याश्च उपस्थिताः आसन्। अनेन कार्यक्रमेन छात्राः ज्योतिषस्य शास्त्रीय- वैज्ञानिक- अनुसन्धानपरक- स्वरूपं ज्ञातुं महत्त्वपूर्णम् अवसरं प्राप्तवन्तः।

कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालये लैङ्गिकविषयेषु संवेदनशीलता-जागरूकतासभा





वार्ताहरः डॉ.निशिकान्तपाण्डेयः

कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययन विश्वविद्यालये १७ सितम्बरः, गुरुवासरे, आन्तरिक-आक्षेप-समितेः (ICC) उपक्रमेण 'लैङ्गिकविषयेषु संवेदनशीलता तथा जागरूकता' इति विषयमधिकृत्य एका जागरूकतासभा समायोजिता।

विश्वविद्यालयस्य सभाकक्षे आयोजितेयं सभा दीपप्रज्वलनेन वेदमन्त्रपाठेन च प्रारब्धा। अस्मिन् कार्यक्रमे विश्वविद्यालयस्य कुलपतिः आचार्यः प्रह्लाद रा. जोशी, आश्रय-स्वयंसेवी-संस्थायाः, नलबारी इत्यस्याः अध्यक्षा श्रीमती रिङ्कु बरुवा महन्तः, आमन्त्रितातिथिरूपेण ग्राम्यविकासमञ्चस्य अध्यक्षः श्री पृथ्वीराज डेका, विश्वविद्यालयस्य सहकुलपतिः प्रोफेसर् मल्लिका कलिता, कुलसचिवः डॉ. मनोजकुमार शर्मा तथा आन्तरिक-आक्षेप-समितेः अध्यक्षा प्रोफेसर् उमामहेश्वरी बगतु इत्येते उपस्थिताः आसन्।

तदतिरिक्तं समितेः सक्रियसदस्या डॉ. पापरी बरुवा इत्यादयः सर्वे सदस्याः, विश्वविद्यालयस्य प्राध्यापकाः प्राध्यापिकाश्च, शोधच्छात्राः, अशैक्षणिक-कर्मचारिणः, छात्राः छात्र्यश्च तथा क्षेत्रस्य स्थानीयाः जनाः सभायाम् उत्साहपूर्वकं सहभागं कृतवन्तः।

सभायां स्वागतभाषणं कुर्वन् विश्वविद्यालयस्य कुलपतिः आचार्यः प्रह्लाद रा. जोशी शैक्षणिकसंस्थासु आन्तरिक-आक्षेप-समितेः गठनसम्बद्धानां ICC-नीतिनिर्देशानां विषये प्रकाशं पातितवान्। शैक्षणिकसंस्थासु सुरक्षितम्, सम्मानजनकं तथा समानतामूलकं वातावरणं निर्मातुं तादृशीनां समितीनां महत्त्वमपि सः विशेषतया प्रतिपादितवान्।

सभायाः मुख्यवक्त्री आश्रय-स्वयंसेवी-संस्थायाः, नलबारी इत्यस्याः अध्यक्षा श्रीमती रिङ्कु बरुवा महन्तः स्वजीवने पुरुषाणां महिलानां च समानरूपेण स्वावलम्बित्वस्य महत्त्वं प्रतिपादितवती। सा आन्तरिक-आक्षेप-समितिसम्बद्धानां विधीनां तथा तेषां सम्यगुपयोगस्य विषये विस्तरेण विवेचनं कृतवती।

कार्यक्रमे आमन्त्रितातिथिः ग्राम्यविकासमञ्चस्य अध्यक्षः श्री पृथ्वीराज डेका प्राचीनमूल्यानाम् आधुनिकचिन्तनस्य च मध्ये समन्वयं स्थापयित्वा संस्कारस्य, नैतिकतायाः तथा मूल्यशिक्षायाः माध्यमेन प्राचीनस्य आधुनिकस्य च मध्ये सुदृढं सेतुनिर्माणं कर्तुं शक्यते इति प्रतिपादितवान्। समाजे लैङ्गिकवैषम्यस्य निवारणाय सः विविधान् उपयोगिनः परामर्शान् अपि प्रदत्तवान्।